श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिचत्वारिंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिचत्वारिंशं दशकम् ॥

## तृणावर्तवधवर्णनम्

त्वामेकदा गुरुमरुत्पुरनाथ वोढुं
गाढाधिरूढगरिमाणमपारयन्ती।
माता निधाय शयने किमिदं बतेति
ध्यायन्त्यचेष्टत गृहेषु निविष्टशङ्का ॥ 43.1 ॥

तावद्विदूरमुपकर्णितघोरघोष -
व्याजृम्भिपांसुपटलीपरिपूरिताशः।
वात्यावपुस्स किल दैत्यवरस्तृणाव -
र्ताख्यो जहार जनमानसहारिणं त्वाम् ॥ 43.2 ॥

उद्दामपांसुतिमिराहतदृष्टिपाते
द्रष्टुं किमप्यकुशले पशुपाललोके।
हा बालकस्य किमिति त्वदुपान्तमाप्ता
माता भवन्तमविलोक्य भृशं रुरोद ॥ 43.3 ॥

तावत् स दानववरोऽपि च दीनमूर्ति -
र्भावत्कभारपरिधारणलूनवेगः।
सङ्कोचमाप तदनु क्षतपांसुघोषे
घोषे व्यतायत भवज्जननीनिनादः ॥ 43.4 ॥

रोदोपकर्णनवशादुपगम्य गेहं
क्रन्दत्सु नन्दमुखगोपकुलेषु दीनः।

त्वां दानवस्त्वखिलमुक्तिकरं मुमुक्षु -
    स्त्वय्यप्रमुञ्चति पपात वियत्प्रदेशात्॥ **43.5** ॥

रोदाकुलास्तदनु गोपगणा बहिष्ठ -
    पाषाणपृष्ठभुवि देहमतिस्थविष्ठम्।
प्रैक्षन्त हन्त निपतन्तममुष्य वक्ष -
    स्यक्षीणमेव च भवन्तमलं हसन्तम्॥ **43.6** ॥

ग्रावप्रपातपरिपिष्टगरिष्ठदेह -
    भ्रष्टासुदुष्टदनुजोपरि धृष्टहासम्।
आघ्नानमम्बुजकरेण भवन्तमेत्य
    गोपा दधुर्गिरिवरादिव नीलरत्नम्॥ **43.7** ॥

एकैकमाशु परिगृह्य निकामनन्द -
    न्नन्दादिगोपपरिरब्धविचुम्बिताङ्गम्।
आदातुकामपरिशङ्कितगोपनारी -
    हस्ताम्बुजप्रपतितं प्रणुमो भवन्तम्॥ **43.8** ॥

भूयोऽपि किन्नु कृणुमः प्रणतार्तिहारी
    गोविन्द एव परिपालयतात् सुतं नः।
इत्यादि मातरपितृप्रमुखैस्तदानीं
    सम्प्रार्थितस्त्वदवनाय विभो त्वमेव॥ **43.9** ॥

वातात्मकं दनुजमेवमयि प्रधून्वन्
    वातोद्भवान् मम गदान् किमु नो धुनोषि।
किं वा करोमि पुनरप्यनिलालयेश
    निश्शेषरोगशमनं मुहुरर्थये त्वाम्॥ **43.10** ॥

॥ इति श्रीमन्नारायणीये त्रिचत्वारिंशं दशकं समाप्तम्॥